309sk26A

# 26

# समसामयिकं संस्कृतसाहित्यम्

भारतस्य प्रतिष्ठे द्वे संस्कृतं चैव संस्कृतिः। साहित्यं समाजस्य प्रतिबिम्बं भवति। संस्कृतभाषा शाश्वती भाषा अस्ति। अतः अस्यां सर्वदा एव साहित्यरचना अभवत्, भवति, भविष्यति च। संस्कृतसाहित्यभागीरथी अविच्छिन्नरूपेण सततं वहति। यथा प्राचीनकाले साहित्यरचना अभवत् तथैव वर्तमानकालेऽपि संस्कृतसाहित्यस्य ग्रन्थानां रचना क्रियते। सम्पूर्णे भारते कवयः संस्कृतसाहित्यनिर्माणे संलग्नाः सन्ति। गद्यं, पद्यं, रूपकं, सर्वेषु एव साहित्यरचना उपलभ्यते। अस्मिन् पाठे समसामयिकसंस्कृतसाहित्यस्य किं वैशिष्ट्यम् काः च नूतनाः प्रवृत्तयः इति पठिष्यामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'समसामयिकम् इति पदस्य अभिप्रायं स्पष्टीकरिष्यति;
- समसामयिकसाहित्यस्य विधानां परिचयं लेखिष्यति;
- समसामयिकसाहित्यस्य ग्रन्थानां नामानि लेखिष्यति;
- समसामयिककवीनां नामानि वक्ष्यति;
- वर्तमानकाले प्रकाश्यमानानां पत्रपत्रिकाणां नामोल्लेखं करिष्यति;
- समाचारपत्र–पत्रिकाणां वारंवारितां स्पष्टीकरिष्यति।

## क्रियाकलापः

अधोलिखितानां ग्रंथानां नामानि यथास्थानं लिखत

उत्तररामचरितम्, कुमारसम्भवम्, ऋक्, छान्दोग्यम्, यजुः, नागानन्दम् शिशुपालवधम्, केन, किरातार्जुनीयम् अथर्व, शाकुन्तलम्, ऐतरेय

| | 1 | 2 | 3 |
|---|---|---|---|
| वेदाः | ऋक् | ———————— | ———————— |
| उपनिषदः' | ———————— | ———————— | छान्दोग्यम् |
| महाकाव्यानि | ———————— | शिशुपालवधम् | ———————— |
| नाटकानि | नागानन्दम् | ———————— | ———————— |

## 26.1 अधुना अवगच्छामः

### प्रथमः अंशः

संस्कृतम् अखिलभारतीयभाषा। यत् साहित्यं वर्तमानकाले लिख्यते तत् समसामयिकं साहित्यं कथ्यते। भारतस्य स्वतंत्रताप्राप्तेः अनन्तरम् प्रभूतं संस्कृतसाहित्यं विरचितम् अस्ति। अस्मिन् साहित्ये पुरातनानां सर्वासां विधानां पालनं क्रियते। महाकाव्यानि, खण्डकाव्यानि, गद्यकाव्यानि, कथाः नाटकादीनि मुक्तककाव्यानि सर्वाणि एव काव्यानि लिखितानि सन्ति। काश्चन नूतनाः प्रवृत्तयः अपि संस्कृतसाहित्ये आगताः यथा एकांकिनाटकानि, मुक्तककाव्यानि, सूडोकविता, हाइकोकविताः इत्यादयः।

> सूडो कविता जापानदेशे प्रचलिता साहित्यविधा अस्ति, यस्याम् अतिन्यूनैः शब्दैः भावानाम् अभिव्यक्तिः क्रियते। 'हाइको' कवितायाम् पंक्तिद्वयेन पंक्तित्रयेण वा भावानाम् अभिव्यक्तिः भवति।

#### मुक्तककाव्यानि

संस्कृतकाव्यसाहित्यं प्रायः छन्दोबद्धम् अस्ति। अत्र पद्ये वर्णानां संख्या, लघुदीर्घवर्णक्रमः निश्चितः भवति (वार्णिकं छन्दः) अथवा मात्राणां संख्या निर्धारिता भवति (मात्रिकं छन्दः)। आधुनिककाले केचन कवयः भावानां प्राबल्यं, लयप्राधान्यम् मनसि कृत्वा काव्यानि रचयन्ति। तानि मुक्तछंदांसि कथ्यन्ते। मुक्तककाव्येषु प्रत्येकं पद्यं स्वतंत्रं भवति।

### एकाङ्कीनाटकानि

एतेषु नाटकेषु एकः एव अङ्कः भवति तत्र विविधानि दृश्यानि भवन्ति। इदानीं विद्यालयेषु प्रायः एकाङ्कीनाटकानां म×चनं भवति।

## पाठगतप्रश्नाः 26.1

1. संस्कृतभाषा किम् एकस्य प्रदेशस्य भाषा अथवा सम्पूर्णभारतस्य?
2. शाश्वती भाषा का अस्ति?
3. संस्कृतकाव्यलेखकाः कस्मिन् प्रदेशे वसन्ति?
4. समसामयिकसाहित्यं किं भवति?
5. संस्कृतसाहित्ये नूतनाः प्रवृत्तयः काः?

---

# द्वितीयः अंशः

## 26.2 महाकाव्यानि

सर्गबद्धं दीर्घकथावृत्तं चरित्रं वा विषयीकृत्य कविना लिखितं महाकाव्यं भवति। भवद्भिः कुमारसम्भवात् हिमालयवर्णनं पठितम्। कुमारसम्भवं महाकाव्यम् अस्ति। एवमेव रघुवंशम् नैषधचरितम्, इत्यादीनि सर्वाणि प्राचीनकाले प्रसिद्धानि महाकाव्यानि। इदानीमपि अनेकानि महाकाव्यानि निरूप्यन्ते–

| महाकाव्यानि | लेखकाः |
|---|---|
| • स्वातन्त्र्यसम्भवम्<br>उत्तरसीताचरितम् | रेवाप्रसाद द्विवेदी |
| • जानकीजीवनम् | राजेन्द्र मिश्रः |
| • इन्दिरागांधीचरितम् | सत्यव्रतशास्त्री |
| • जवाहरज्योतिमहाकाव्यम् | जी. बी. पल्सुले |
| • श्रीभार्गवराघवीयम्<br>(परशुराम–रामकथा) | रामभद्राचार्यः |

एतानि अतिप्रसिद्धानि कानिचित् महाकाव्यानि। श्रीरामभद्राचार्यः बाल्यकालाद् एव नेत्रज्योतिहीनः तथापि सः महाकाव्यं रचितवान् अनेकान् पुरस्कारान् उपाधीन् च लब्धवान्।

### खण्डकाव्यानि/मुक्तककाव्यानि/यात्राकाव्यानि

कथायाः एकं प्रसंगं खण्डं वा विषयीकृत्य रचितं काव्यं खण्डकाव्यं कथ्यते यथा

मेघदूतम्। प्रत्येकं पद्यं यत्र स्वतन्त्रं भवति तत् मुक्तककाव्यं कथ्यते। येषु काव्येषु यात्रायाः वर्णनं भवति तानि यात्राकाव्यानि उच्यन्ते।

प्रमुखानि विविधानि काव्यानि अधोलिखितानि सन्ति–

**काव्यानि**

- रामकृष्णपरमहंसीयम्
- गुरुगोविन्दसिंहचरितम्
- षड्ऋतुवर्णनम्
- गोवर्धनगौरवम्

| **यात्राकाव्यानि** | **लेखकः** |
|---|---|
| • शर्मण्यदेशः सुतरांविभाति | डॉ. सत्यव्रतशास्त्री |
| • थाईदेशविलासम् | डॉ. सत्यव्रतशास्त्री |

**पत्रकाव्यानि**

छन्दोबद्धानि पत्राणि येषु काव्येषु संकलितानि क्रियन्ते तानि पत्रकाव्यानि उच्यन्ते।

| | |
|---|---|
| • करुणाकटाक्षलहरी | रसिकबिहारी जोशी |

**गीतिकाव्यानि**

| | |
|---|---|
| • राघवीयगीतगु×जनम्, भक्तिगीतसुधा | रामभद्राचार्यः |
| • तदेव गगनं सैव धरा | श्रीनिवासरथः |
| • भाति मे भारतम् | डॉ. रमाकान्त शुक्लः |

**मुक्तककाव्यानि**

मुक्तककाव्ये प्रत्येकं पद्यं स्वतन्त्रं भवति। जीतरामभट्टस्य 'अनुभूतिशतकम्', अशोक डबरालस्य 'क्षुधते मे हृदयं' प्रमुखाः काव्यसंग्रहाः सन्ति।

**शतककाव्यानि**

शतककाव्येषु प्रायः शतम् पद्यानि भवन्ति। शतककाव्यानां लेखकाः बहवः सन्ति। तत्र प्रमुखानि शतककाव्यानि सन्ति –

| | |
|---|---|
| • पाथेयशतकम् | डॉ. रामकरण शर्मा |
| • भारतशतकम् | डॉ. राजेन्द्र मिश्रः |
| • इन्दिराकीर्तिशतकम् | डॉ. श्रीकृष्ण सेमवालः |
| • स्वातन्त्र्यवीरशतकम् | श्रीधर भास्कर वर्णेकरः |

### दूतकाव्यानि

कालिदासस्य मेघदूतम् अनुकृत्य बहूनि दूतकाव्यानि कविभिः लिखितानि। दूतकाव्ये दूतद्वारा कश्चन सन्देशः प्रेष्यते। मेघदूते मेघः एव दूतः तत्र विरहपीडितः यक्षः दूतेन मेघेन स्वप्रियतमां प्रति सन्देशं प्रेषयति। कानिचित् प्रसिद्धानि दूतकाव्यानि अधोलिखितानि सन्ति –

- काकदूतम्
- बकदूतम्
- शुकदूतम्
- कोकिलदूतम्
- हंससन्देशः

### सूडोकाव्यम्

सूडोकवितायां द्वे वा तिस्रः एव पंक्तयः भवन्ति। हर्षदेवमाधवः सूडोकवितानां क्षेत्रे प्रयोगम् अकरोत्। तस्य काव्यं 'निष्क्रान्ताः सर्वे' संस्कृत–समसामयिकसाहित्ये नूतनां काव्यविधां प्रस्तौति।

## पाठगतप्रश्नाः 26.2

1. समसामयिकसंस्कृतसाहित्ये कति महाकाव्यानि लिखितानि सन्ति?
2. स्वातन्त्र्यसम्भवम् महाकाव्यं केन लिखितम्?
3. सत्यव्रतशास्त्रिणा इन्दिरागांधिम् आश्रित्य किं महाकाव्यं रचितम्?
4. श्रीभार्गवराघवीयम् काव्यस्य विषयः कः ?
5. थाईदेशविलासम् कीदृशं काव्यम् अस्ति, महाकाव्यं/यात्राकाव्यम्।
6. तदेव गगनं सैव धरा इति कस्य कवेः रचना?
7. अभिराजराजेन्द्रमिश्रेण कृतस्य शतककाव्यस्य नाम लिखत।

## तृतीयः अंशः

## 26.3 पद्यात्मककाव्य–नाटकम्

अस्माभिः पद्यात्मककाव्यविषये पठितम्। इदानीं समसामयिकनाटकसाहित्यस्य विषये जानीमः। वर्तमानकाले अपि नाटकानां प्रचुरं लेखनम् अभवत्। प्रायः शतात् अधिकानि

नाटकानि लिखितानि। कानिचित् नाटकानि परम्परागतविधिना लिखितानि। यथा भरतमुनेः नाट्यशास्त्रे वर्णितम्। परन्तु इदानीम् एकाि नाटकानि अपि लिख्यन्ते। एकाि नाटके दृश्यानि अनेकानि भवन्ति परन्तु सम्पूर्णं नाटकम् एकां घटनां समस्यामेव अ ीकृत्य लिख्यते।

कानिचित् प्रसिद्धानि नाटकानि सन्ति–

| **नाटकम्** | **लेखकः** |
|---|---|
| विवेकानन्दविजयम्<br>शिवराज्याभिषेकम् | श्रीधरभास्करवर्णेकरः |
| समानमस्तु वो मनः<br>धन्योऽहं धन्योऽहम् भासो हासः | गजानन बालकृष्ण पल्सुले |
| मेनकाविश्वामित्रम् | हरिनारायण दीक्षितः |

### एकाि नाटकानि

पण्डितक्षमारावद्वारा चत्वारि त्र्य त्मकानि सप्त च एकाि नाटकानि रचितानि। अभिराजराजेन्द्रमिश्रमहोदयैः अनेकानि एकाि नाटकानि लिखितानि। पल्सुलेमहोदयद्वारा 'अथातो ज्ञानेश्वरोऽभूत्' नाम्ना लघुनाटक–संग्रहः प्रकाशितः। नोदनाथमिश्रकृतं 'नवमालती' एकाि नाटकम् अपि प्रसद्धिम् अस्ति। एतेषां नाटकानां समये समये म चनम् अपि भवति।

## 26.4 चम्पूकाव्यानि

गद्यपद्यमयं काव्यं 'चम्पूः' इति कथ्यते।

पण्ढरीनाथाचार्यगलगली द्वारा त्रीणि चम्पूकाव्यानि रचितानि –

1. पवनपावनचम्पूः
2. सत्यध्यानविजयचम्पूः
3. श्रीशम्भूविजयलिङ्गेश्वरचम्पूः।

जयमन्तमिश्रमहोदयस्य महामानवचम्पूः भारतस्य गौरवगाथां जीवनदर्शनं च प्रस्तुतं करोति।

## 26.5 गद्यकाव्यानि

गद्ये पदप्रयोगस्य बन्धनं न भवति अतः गद्यलेखकः स्वतन्त्रः भवति परन्तु गद्ये अपि चमत्कारः भवति अतः गद्यलेखने एव कवेः परीक्षा भवति। कानिचित् आधुनिकानि गद्यकाव्यानि सन्ति–

| काव्यम् | लेखकः |
|---|---|
| द्वा सुपर्णा | डॉ. रामजी उपाध्यायः |
| रयीशः | डॉ. रामकरण शर्मा |
| गुहावासी | सत्यप्रकाशसिंहः |

अनेके कथासंग्रहाः अपि सन्ति यथा–

| काव्यम् | लेखकः |
|---|---|
| 1. कथाप×चकम् <br> 2. ग्रामज्योतिः | 'पण्डितक्षमाराव' इति |
| 3. कथासंग्रहः | वनमालीविश्वासः |

## 26.6 अनूदितसाहित्यम्

यूयं जानीथ एव यत् साहित्यं तु सर्वासु एव भाषासु लिख्यते। तेषाम् अनुवादं पठित्वा वयं तेन साहित्येन परिचिताः भवामः। एवं संस्कृतसाहित्यस्य वृद्धिः अपि भवति।

केचन अनूदितग्रन्थाः निम्नलिखिताः सन्ति –

| कविः | ग्रन्थाः | अनुवादकर्ता |
|---|---|---|
| रवीन्द्रनाथ ठाकुरः | गीतांजलिः | संस्कृत आकादमी |
| जयशंकर प्रसादः | कामायनी | संस्कृत आकादमी |
| धर्मग्रन्थः | कुरानः/बाइबिलः | वनेश्वरपाठकः |
| | तेनालीरामकथा | ओमप्रकाश ठाकुरः |

एवम् अनेके प्रसिद्धाः ग्रन्थाः इदानीं संस्कृत–भाषायाम् अनूदिताः सन्ति।

## 26.7 पत्रपत्रिकाः

कस्याः अपि भाषायाः समसामयिकसाहित्यं पूर्वं पत्रिकासु एव प्रकाश्यते। सम्पूर्णभारते विविधेषु प्रान्तेषु अनेकाभिः संस्थाभिः शताधिकाः पत्रपत्रिकाः प्रकाश्यन्ते। त्रीणि समाचार–पत्राणि दैनिकानि सन्ति – सुधर्मा, नवप्रभातम्, भारतवर्षजनतादैनिकसंस्कृतम् इति। चतस्रः पत्रिकाः साप्ताहिक्यः सन्ति। एवं काश्चन पत्रिकाः मासे मासद्वये, मासत्रये वा प्रकाश्यन्ते। एतासु पत्रिकासु विविधाः समाचाराः, शोधकार्याणि, कविताः धारावाहिकरूपेण पद्यकाव्यानि, गद्यकाव्यानि च प्रकाश्यन्ते। भारतीयविश्वसंस्कृतम् अर्वाचीनसंस्कृतम् चन्दामामा, सम्भाषणसंस्कृतम्, विश्वभाषा, संस्कृतम×जरी इत्यादिपत्रिकाः विशेषरूपेण लोकप्रियाः सन्ति।





## पाठगतप्रश्नाः 26.3

1. 'समानमस्तु वो मनः' नाटकं कस्य कृतिः अस्ति?
2. 'चम्पूः' इति काव्ये किं भवति?

   (क) गद्यम् (ख) पद्यम् (ग) उभयम्
3. जयमन्तमिश्रस्य महामानवचम्पूः किं प्रस्तौति?
4. बाइबिल इति ग्रन्थस्य अनुवादः केन संस्कृतकविना कृतः?
5. कति संस्कृतपत्र–पत्रिकाः अद्यत्वे प्रकाश्यन्ते?
6. तेनालीरामकथाः संस्कृते केन वर्णिताः?
7. भवान् काम् संस्कृतपत्रिकां पठति/जानाति वा? तस्याः नाम, प्रकाशनस्थानं च लिखतु।

---

## 26.8 किम् अधिगतम्

- संस्कृतं शाश्वती भाषा अस्ति।
- संस्कृतभाषायाम् अविच्छिन्नरूपेण साहित्यं रचितम् वर्तते।
- वर्तमानकाले लिखितं लिख्यमानं च साहित्यं समसामयिकसाहित्यम् इति उच्यते।
- समसामयिके संस्कृतसाहित्ये परःशतानि महाकाव्यानि लिखितानि सन्ति।
- प्राचीनाः परम्पराः संरक्षिताः नूतनाः च प्रवृत्तयः अपि स्वीकृताः।
- खण्डकाव्यानि, मुक्तककाव्यानि, दूतकाव्यानि, शतककाव्यानि आधुनिककविभिः अपि लिखितानि।
- कविभिः यात्राकाव्यानि गीतिकाव्यानि पत्रकाव्यानि अपि लिखितानि।
- समसामयिके संस्कृतसाहित्ये नाटकानि एकांकिनाटकानि नाटककारैः लिखितानि।
- गद्यसाहित्ये उपन्यासाः कथासंग्रहाः च प्रकाशिताः सन्ति।
- अन्याभ्यः भारतीयभाषाभ्यः विदेशीभाषाभ्यः विशिष्टसाहित्यस्य संस्कृतभाषायाम् अनुवादः अनुलेखनं च कृतम् अस्ति।
- गद्यपद्यमिश्रितानि चम्पूकाव्यानि अपि कविभिः लिख्यन्ते।
- संस्कृतभाषायां वर्तमानकाले विविधाः पत्रपत्रिकाः प्रकाश्यन्ते।

## 26.9 पाठान्तप्रश्नाः

1. समसामयिकसाहित्यस्य द्वे नूतने प्रवृत्ती लिखत।
2. महाकाव्यं किं भवति? द्वयोः प्राचीनमहाकाव्ययोः द्वयोः च आधुनिकमहाकाव्ययोः नाम लिखत।
3. भारते सूडोसाहित्यनिर्माता कः? सूडो इति कवितायाः किं वैशिष्ट्यम्?
4. दूतवाक्यं कि भवति? कालिदासेन किं दूतकाव्यम् लिखितम्? आधुनिककाले द्वयोः दूतकाव्ययोः नाम लिखत।
5. (अ) कस्यचिदेकस्य एकांकी–नाटकस्य नाम लिखत।

   (ब) भवद्भिः किं नाम संस्कृतनाटकं पठितम् ? तस्य विषयवस्तु दशवाक्येषु लिखत।
6. विवेकानन्दस्य किं योगदानम्? विवेकानन्दनाटकस्य रचयिता कः ?
7. पत्रिकायाः साहित्ये योगदानम् वर्णयत। स्व–अनुभवात् एकां पत्रिकाम् अधिकृत्य तस्य वैशिष्ट्यं वर्णयत।

## 26.10 उत्तराणि

**26.1**

1. सम्पूर्णभारतस्य
2. संस्कृतम्
3. सम्पूर्णभारते
4. वर्तमानकाले यत् साहित्यं रच्यते तत् समसामयिकं साहित्यम्।
5. मुक्तककाव्यानि, यात्राकाव्यानि, सूडो कविता, एकांकिनाटकानि, कथासंग्रहः, अनूदितकाव्यानि

**26.2**

1. अनेकानि शताद् अपि अधिकानि
2. रेवाप्रसादद्विवेदिना
3. इन्दिरागांधिचरितम्
4. परशुरामस्य रामस्य च कथा
5. यात्राकाव्यम्
6. श्रीनिवासरथस्य
7. भारतशतकम्



टिप्पणी

**26.3**

1. गजाननबालकृष्णपल्सुलेकवेः
2. उभयम्
4. भारतस्य गौरवगाथां जीवनदर्शनं च
4. वनेश्वरपाठकः
5. शताधिकाः
6. ओमप्रकाश ठाकुर महोदयेन
7. स्वयम् उत्तरतु

**26.9 पाठान्तप्रश्नाः**

1. एकांकिनाटकम् मुक्तककाव्यानि,/यात्राकाव्यानि, सूडोकविता।
2. महाकाव्यं सर्गबन्धम् विस्तृतं काव्यं भवति। दीर्घं कथावृत्तम् भवति। उदात्तं चरित्रम् अधिकृत्य वर्णनं भवति। रघुवंशम्, कुमारसम्भवम् कालिदासस्य महाकाव्यद्वयम्। स्वातन्त्र्य सम्भवम् इन्दिरागांधीचरितम् चाधुनिके महाकाव्ये।
3. हर्षदेवमाधवः, सूडोसाहित्यस्य प्रवर्त्तकः। पंक्तिद्वयेन पंक्तित्रयेण वा कविः स्वभावानाम् अभिव्यक्तिं करोति।
4. यत्र कमपि दूतं सम्बोध्य सन्देशः प्रेष्यते यथा कालिदासेन मेघदूते मेघमाध्यमेन सन्देशः प्रेषितः। आधुनिककाले काकदूतम्, बकदूतम्, शुकदूतम् इत्यादीनि दूतकाव्यानि प्रसिद्धानि।
5. (अ) अथातो 'ज्ञानदेवोऽभूत्' नामकं रूपकम् पल्सलेमहोदयेन लिखितम्।

   (ब) स्वयं पठितनाटकस्य नाम कथावस्तु च लिखतु।
6. विवेकानन्दः सम्पूर्णभारते वेदान्तस्य प्रचारम् अकरोत्। श्रीधरभास्करवर्णेकरः विवेकानन्दविजयम् इति नाटकं लिखितवान्।
7. पत्रिका समसामयिकसाहित्यस्य प्रमुखः आधारः। प्रायः नूतनाः रचनाः पत्रिकासु एव प्रकाश्यन्ते। तत्र विविधाः समाचाराः, मनोरंजक–चाटुचणकाः च प्रकाश्यन्ते। स्वपठितायाः कस्याश्चित् पत्रिकायाः वैशिष्ट्यं स्वयमेव वर्णयतु।